# Anubhavanandacharyapranita Shrigitarthasudha

# અનુભવાનન્દાચાર્યપ્રણીતા શ્રીગીતાર્થસુધા

## Document Information

Text title : Anubhavanandacharyapranita Shrigitarthasudha

File name : gItArthasudhAanubhavAnandAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : anubhavAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# અનુભવાનન્દાચાર્યપ્રણીતા શ્રીગીતાર્થસુધા

ઉત્પત્ત્યાદિવિધાયકં ચ જગતો હેતું પરં ચેશ્વરં
જીવાજીવાશરીરિણં સુશરણં ભક્ત્યૈવ સાયુજ્યદમ્ ।
નિર્દોષં સુગુણાકરં નિખિલવિદ્વેદાન્તગમ્યં વિભું
ગીતોક્તં વરદં નતોઽસ્મિ કરુણામ્ભોધિં પ્રભું રાઘવમ્ ॥ ૧॥

નત્ત્વા ગુરું તથાઽઽનન્દભાષ્યકારં જગદ્ગુરુમ્ ।
કરોયનુભવાનન્દઃ સુધાં મૃત્યુવિનાશિનીમ્ ॥ ૨॥

કર્મજ્ઞાનપ્રસાધ્યા ભગવતિ પરમા ભક્તિરેકોભ્યુપાયઃ
શ્રેષ્ઠો મોક્ષસ્ય વાચ્યો મતમિતિવિદિતં જ્ઞાપયિષ્યન્મુકુન્દઃ ।
ધર્માધર્મપ્રસઙ્ગાદ્ વિકલિતમનસં પાર્થમુદ્દિશ્ય ગીતા-
માહોપોદ્ઘાતરૂપઃ સુદૃઢમભિહિતસ્તત્ર ચાદ્યઃ પ્રપાઠઃ ॥ ૩॥

પ્રોક્તૌ દેહાત્મબુદ્ધ્યાસ્વજનમમતયા બાલિશે મોહશોકૌ
ક્ષીયેતે તૌ ચ બોધાત્ ફલમતિરહિતાત્ કર્મણઃ સોઽપિ સિધ્યેત ।
તસ્માદ્ ભક્તિઃ પરેશે નિયમિતમનસા પ્રાપ્યતે સત્વવૃદ્ધ્યા
તસ્યાઃ શાન્તિર્ધ્રુવાત્મા ફલમિદમશિષત્ કૃષ્ણ ચન્દ્રો દ્વિતીયે ॥ ૪॥

જ્ઞાનં કર્મેતિ નિષ્ઠાદ્ધયમિહ જગતિ પ્રાહુરામ્નાયવિજ્ઞાઃ
કર્મારમ્ભં વિહાય ક્ષણમપિ ભજતે નૈવ કશ્ચિત્ પ્રશાન્તિમ્ ।
તસ્માત્ કર્માનુવૃત્તિર્ભગવતિ મનસા ન્યાય કર્માણિ સમ્યક્
કર્તવ્યા પુણ્યપુંસા ગલિતફલતૃષા પ્રોક્તમેતત્ તૃતીયે ॥ ૫॥

પ્રોક્તા કર્મપ્રસઙ્ગાન્નિજવિભવકથા નિત્યકર્માણિ પશ્ચાત્
કર્માકર્મસ્વરૂપં મતિસૃતિમશિષ્ત કર્મભિઃ સમ્પ્રવૃત્તામ્ ।
યજ્ઞાનાં દ્વાદશાનામનુકથનમિતો જ્ઞાનયજ્ઞસ્ય મૌખ્યં
જ્ઞાનાગ્નિર્નાશયત્યેવવૃજિનનિચયં તૂર્ય ઇત્યભ્યધત્ત ॥ ૬॥

જ્ઞાનાકારં વિધત્તે શ્રુતિવિદિતફલં કર્મ સમ્પચ્યમાનં

સન્યાસસ્તસ્ય નેષ્ટઃ સમમતિરુદિતા હ્યાત્મલબ્ધેરુપાયઃ ।
ભોગાનાં દુઃખદત્ત્વાદ્વિરતિરતિતરાં પણ્ડિતૈસ્તેભ્ય ઇષ્ટા
સ્વર્થાનેતાનવાદીત્ પ્રણતસુરતરુઃ પઞ્ચમે વાસુદેવઃ ॥ ૭॥

યોગાભ્યાસસ્ય રીતિર્વિરતિરતિશયા સંસૃતેર્મોહજાલા-
ચ્ચાતુર્વિધ્યં પ્રતીતં સમમતિરધિકો યોગિનાં તત્ર ચોક્તઃ ।
યોગસ્યોત્કૃષ્ટસિદ્ધિઃ પરગતિફલિકા શ્રદ્ધયા યઃ સ યુક્તો
યોગિષ્વેતેષુ ચેડ્યં ભજતિ હરિમિતિપ્રાહ ષષ્ઠે પદાર્થાન્ ॥ ૮॥

યાથાર્થ્યં સ્વસ્ય ચોક્તં જગતિ જનચયો માયયા મોહમાપ્ત-
સ્તાર્મતાં તર્તુકામૈઃ ખરરિપુચરણે સુપ્રપત્તિર્વિધેયા ।
સેવા દેવાન્તરાણાં પરિમિતફલદા નૈવ કાર્યા પ્રપન્નૈ-
ર્જ્ઞાની શ્રેષ્ઠઃ સમેષામિતિમતમવદત્ સપ્તમે શ્રીમુકુન્દઃ ॥ ૯॥

પ્રશ્નાઃ પાર્થસ્ય સપ્ત પ્રતિવચનમથો વર્ણનં ચાન્તિમસ્ય
બ્રહ્માઽનુધ્યાનતોઽદ્ધા હ્યસુગતિસમયે બ્રહ્મભાવં સદૈતિ ।
ક્ષેત્રજ્ઞસ્યાપ્યુપાસ્તૌ પ્રકૃતિવિરહિણઃ સદ્ગતિઃ સૈવ શુક્લા
હેતુર્નૈવાગતેઃ સા સૃતિરિતિભગવાનષ્ટમે સ્પષ્ટમાખ્યત્ ॥ ૧૦॥

માહાત્મ્યં સ્વસ્ય દિવ્યં જગતિ ભગવતો વ્યાપ્તિરન્તઃ સમસ્મિન્
ભક્ત્યારાધ્યઃ પરેશઃ સુમહિતમનસાં લક્ષણં કાર્યમેષામા ।
આવૃત્તિશ્ચાત્ર ભૂયો વિલયમુપગતે કર્મિણાં સ્વર્ગલોકે
શ્રીશોપાસ્તેઃ સ્વરૂપં તતમિતિ નવયે પ્રાદિશદ્ દેવદેવઃ ॥ ૧૧॥

વ્યાપ્તં વિશ્વં સમસ્તં કિલ ચરમચરં યેન સર્વાધિપેના-
ત્રાસીમૈશ્વર્યશાલી વિમલગુણનિધિર્યઃ સ્વતન્ત્રઃ પરાત્મા ।
યત્સ્વાયત્તસ્વરૂપસ્થિતિગતિરુદિતા યદ્વિભૂતિસ્ત્વનન્તા
સર્વાત્મા સોઽયમેકઃ પ્રભુરિતિદશમે નિશ્ચિકાયાદિદેવઃ ॥ ૧૨॥

પાર્થશ્ચેશં દિદૃક્ષુર્હિ વપુરતિતતં ચર્મચક્ષુર્ન યોગ્યં
તસ્મૈ દત્ત્વા તુ દિવ્યં સ્મયભયજનકં દર્શયામાસ કૃષ્ણઃ ।
મેઘાન્ વિદ્યુન્મહીધાન્ ક્ષિતિજલધિયુતાન્ સૂર્યચન્દ્રાદિદેવાન્
દૃષ્ટ્વા દેવસ્ય દેહે શરણમુપગતોઽવોચદેકાદશેઽર્થાન્ ॥ ૧૩॥

શ્રેષ્ઠોપાયસ્તુ મુક્તેર્ભગવતિ સુદૃઢા પ્રીતિરેકૈવ શુદ્ધા
તત્રાશક્તસ્ય કર્મણ્યભિરુચિરુચિતા હ્યાત્મનિષ્ઠસ્ય પુંસઃ ।
આત્મોપાસ્તેઃ પ્રકારા અતિરતિમદિશત્ સ્વસ્ય ભક્તે પરેશઃ

સ્વાર્થાનેતાનવાદીચ્છ્રિતજનરતિકૃદ્ દ્વાદશે ચ પ્રપાઠે ॥ ૧૪॥

ક્ષેત્રક્ષેત્રજ્ઞરૂપં પ્રકૃતિપુરુષયોર્ભેદ આત્મસ્વરૂપ-
જ્ઞાનોપાયાસ્તથાઽત્ર ત્રિગુણપુરુષયોર્યોગતો વિશ્વસૃષ્ટિઃ ।
કર્તૃત્વે હેતુરેકા પ્રકૃતિરથ પુમાન્ ભોક્તૃભાવે ચ હેતુ-
ર્બન્ધોચ્છેદો વિવેકાત્ ત્રિસહિતદશમે શૌરિણોક્તાઇમેઽર્થા ॥ ૧૫॥

સૂતે વિશ્વં સમસ્તં પ્રકૃતિરનુપમા બ્રહ્મસ્વાયત્તમૂર્તિઃ
સત્વાદીનાં ત્રયાણાં પ્રકૃતિગુણતયા દેહિનો બન્ધકત્વમ્ ।
લિઙ્ગં કાર્યઞ્ચ તેષાં ખલુ મતિકૃતિભિર્દર્શિતં તત્કૃતોઽયં
બન્ધો ભક્ત્યા પ્રહેયો દ્વિગુણિત ઉદિતાઃ સપ્તકેઽર્થા મુદૈતે ॥ ૧૬॥

સંસારોઽશ્વત્થવૃક્ષઃ શ્રુતિવિદિતપદોઽવ્યક્તમૂલશ્ચ તં વૈ
છિત્ત્વાઽસઙ્ગાખ્યહેત્યા પ્રપદનમનિશં રાઘવેશે વિધેયમ્ ।
બદ્ધાન્મુક્તાત્ પરશ્ચોત્તમપુરુષ ઇતિ ખ્યાત ઈશઃ સ્વતન્ત્રો
ભર્તા ચાસ્યૈક એવાવદદિતિ દશમે પઞ્ચયુક્તેઽર્થજાતમ્ ॥ ૧૭॥

દૈવી સમ્પજ્જનાનાં ભવતિ સુકૃતિનાં મુક્તયે કર્મબન્ધા-
ન્નિત્યં બન્ધાય લોકે કુટિલમતિજુષામાસુરી સા દુરન્તા ।
કાર્યાકાર્યવ્યવસ્થાં દિશતિ હિતતમં શાસ્ત્રમેતસ્ય ત્યાગ-
શ્ચાસુર્યા મૂલમુક્તં નિરયફલમિમે ષોડશે વર્ણિતાર્થાઃ ॥ ૧૮॥

વૈધં શાસ્ત્રીયકર્મ ત્રિગુણપરવશં યજ્ઞદાને તપશ્ચ
ત્રૈવિધ્યં તસ્ય વેદ્યં સુકૃતિયુતનરૈઃ સાત્ત્વિકૈઃ સાત્ત્વિકં વૈ ।
ગ્રાહ્યં નૈવાસુરં તત્ ખલુ ફલરહિતં લક્ષણં તસ્ય સમ્યક્
શ્રીમત્કૃષ્ણેન ચોક્તં વરમિહ દશમે સપ્તયુક્તે પ્રપાઠે ॥ ૧૯॥

સન્યાસઃ ત્યાગરૂપો જગતિ મનુજૈઃ સત્વમાલમ્બનીયં
સીતાનાથઃ પરેશોઽમલગુણજલધિર્દિવ્ય દેહોઽક્તારી ।
સર્વજ્ઞઃ સર્વશક્તિઃ કૃતિચયફલદઃ કર્મણાં સંવિધાતા
સાયુજ્યં તત્પ્રપત્ત્યા ભવતિ તનુભૃતાં પ્રોક્તમન્ત્યેઽત્ર ચૈતત્ ॥ ૨૦॥

શ્રીગીતાર્થસુધા ચૈષાઽનુભવાનન્દનિર્મિતા ।
જન્મમૃત્યુવિનાશાય ભૂયાન્મનનશાલિનામ્ ॥ ૨૧॥

ઇતિ શ્રીમદ્ અનુભવાનન્દાચાર્યપ્રણીતા શ્રીગીતાર્થસુધા સમ્પૂર્ણા ।

Encoded and proofread by Mrityunjay Pandey

*Anubhavanandacharyapranita Shrigitarthasudha*
pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*